## कोपधाच्च। (७९/१२९१)

ककारोपधात् च प्रातिपदिकात् अण् प्रत्ययो भवति चातुरर्थिकः। यथासम्भवमर्थसम्बन्धः। कूपलक्षणस्यो[1]वर्णलक्षणस्य चात्रोऽपवादः। [2]कार्णच्छिद्रिकः [3]कूपः। कार्णवेष्टकः। [4]कृकवाकुना निर्वृत्तं कार्कवाकवम्। [5]त्रैशङ्कवम्॥

## वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यककठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसङ्काशबलपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः। (८०/१२९२)

वुञादयः सप्तदश प्रत्ययाः, अरीहणादयोऽपि सप्तदशैव[6] प्रातिपदिकगणाः। आदिशब्दः प्रत्येकमभिसम्बध्यते। तत्र यथासङ्ख्यं [7]सप्तदशभ्यः प्रातिपदिकगणेभ्यः सप्तदश[8] प्रत्ययाः भवन्ति चातुरर्थिकाः। अणोऽपवादः। यथासम्भवमर्थसम्बन्धः। अरीहणादिभ्यो वुञ् प्रत्ययो भवति। आरीहणकम्। द्रौघणकम्।

अरीहण। [9]द्रुघण। खदिर। [10]सार। भगल। उलन्द। साम्परायण। [11]क्रौष्ट्रायण। भास्त्रायण। मैत्रायण। त्रैगर्तायन। रायस्पोष। [12]विपथ। उद्दण्ड। उदञ्चन। खाडायन। खण्ड। वीरण। काशकृत्स्न। [13]जाम्बवन्त। शिंशपा। किरण। रैवत। बैल्व। वैमतायन। [14]सौसायन। [15]शाण्डिल्यायन। शिरीष। बधिर[16]। अरीहणादिः।

कृशाश्वादिभ्यः छण् प्रत्ययो भवति। कार्शाश्वीयः। आरिष्टीयः।

कृशाश्व। अरिष्ट। अरीश्व। वेश्मन्। विशाल। रोमक। शबल। कूट। रोमन्। बर्बर। सुकर। सूकर। प्रतर। सदृश। पुरग। सुख। धूम। अजिन। विनता। अवनत। [17]विकुधास। अरुस्। अवयास। मौद्गल्य। कृशाश्वादिः।

[18]ऋश्यादिभ्यः कः प्रत्ययो भवति। [19]ऋश्यकः। न्यग्रोधकः।

ऋश्य। न्यग्रोध। शिरा। निलीन। निवास। निधान। निवात। निबद्ध। विबद्ध। परिगूढ। उपगूढ। उत्तराश्मन्। स्थूलबाहु। खदिर। शर्करा। अनडुह्। परिवंश। वेणु। वीरण। ऋश्यादिः।

कुमुदादिभ्यः ठच् प्रत्ययो भवति। कुमुदिकम्। शार्करिकम्।

कुमुद। शर्करा। न्यग्रोध। [20]इत्कट। गर्त। बीज। अश्वत्थ। बल्वज। परिवाप। शिरीष। [21]यवाष। कूप। [22]विकङ्कत। कुमुदादिः।

---

1. उवर्णान्तलक्षणस्य क. फ. 2. कर्णच्छिद्रकेण निर्वृत्तः इत्यधिकम् ब. क. ड. फ. ह, कर्णचित्रकेण निर्वृत्तः कार्णचित्रकः कूपः ड. 3. कूप नास्ति फ. 4. कृतवाकुना निवृत्तम् – कार्तवाकवम् ह. 5. त्रैशङ्कवम् नास्ति क, त्रैशङ्कवः ह. 6. एव नास्ति ड. फ. 7. सप्तदशप्रातिपदिकेभ्यः फ. 8. एव इत्यधिकम् ह. 9. द्रुगण ब. 10. नास्ति ब. 11. क्रौष्टायन ब. फ. 12. विपाश ब. 13. जाम्ब ब. 14. गौमतायन इत्यधिकम् ब. 15. खाण्डायन बिल्व सुयज्ञ इत्यधिकम् ब. 16. जम्बूखदिर इत्यधिकम् ब. 17. विधास ब. 18. ऋष्यादिभ्यः ब. 19. ऋष्यकः ब. 20. उत्कट कङ्कट सङ्कट इत्यधिकम् ब. 21. पलाश ब. 22. त्रिक कत दशग्राम त्यधिकम् ब.